ROLL NO | | | | | |

# DAV PUBLIC SCHOOLS, ODISHA ZONE
## PERIODIC ASSESSMENT- III, 2023-24

- Please check that this question paper contains 05 printed pages.
- Check that this question paper contains 11 questions.
- Write down the serial number of question in the left side of the margin before Attempting it.

## CLASS-IX
## SUBJECT- COMMUNICATIVE SANSKRIT

**Time- 1hour 30 minutes** **Maximum Marks- 40**

सामान्य निर्देशाः

- ❖ अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
- ❖ प्रत्येकं खण्डं अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
- ❖ उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयम्।
- ❖ प्रश्नस्य क्रमाङ्कः प्रश्नानुसारेण एव लेखनीयः।
- ❖ सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि। प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**'क' भागः (अपठितावबोधनम्)**

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –

यद्यपि संसारे बहूनि धनानि सन्ति,परन्तु तेषु धनेषु विद्याधनं एव श्रेष्ठधनमस्ति। अतएव उच्यते - "विद्याधनं सर्वधनप्रधानम्"। विद्यया मनुष्य: स्वकीयं कर्त्तव्यं जानाति। विद्ययैव जानाति यत् को धर्म: , को अधर्म: , किं कर्त्तव्यम् , किम् अकर्तव्यम् , किं पुण्यम्, किं पापम् इति। विद्यया आचार-व्यवहारे च शुद्धता जायते। सर्वे विद्यां प्राप्य सन्मार्गम् अनुवर्त्तन्ते।

**I.एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** (½ x2=1)

(i) श्रेष्ठधनं किम् अस्ति ?

(ii) विद्यया स्वकीयं कर्त्तव्यं क: जानाति?

(iii) बहूनि धनानि कुत्र सन्ति?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नमेकम्)** (1 x1=1)

(i) सर्वे विद्यां प्राप्य कुत्र अनुवर्त्तन्ते ?

(ii)विद्यया मनुष्य: किं जानाति ?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** (1×1=1)

**IV. भाषिक-कार्यम् (केवलं द्वयम्)** (1×2=2)

(i) " **सन्ति** " इति क्रियापदस्य कर्त्तृपदं किम् ?

(क) लाभ: (ख) जनाः (ग) धनानि (घ) संसारे

(ii) **"बहूनि"** इति पदं कस्य विशेषणपदम् अस्ति ?

(क) धनानि (ख) विद्या (ग) सन्ति (घ) मनुष्य:

(iii) "**पुण्यम्** " इत्यस्य किं विलोमपदं प्रयुक्तम् ?

(क) अकर्त्तव्यम् (ख) लाभ: (ग) पापम् (घ) विद्या

**'ख' भागः (रचनात्मककार्यम्)**

**2. मञ्जूषातः समूचितपदैः अधोलिखितं संवादं पूरयित्वा पुनः लिखत-** (½ x10=5)

**क्षमा –** स्वागतं ते अस्यां (i) ----------------।

**शुभ्रा –** धन्यवादाः ।

**क्षमा –** प्रिय सखि ! किं (ii) -------------- नाम ?

**शुभ्रा –** मम नाम शुभ्रा अस्ति।

**क्षमा –** शुभ्रे ! कस्मात् (iii) --------------- आगता असि ?

**शुभ्रा –** अहम् मुम्बईनगरस्य (iv) -------------- आगता अस्मि ।

**क्षमा –** अहमपि पञ्चमी-कक्षापर्यन्तं तत्रैव अपठम्। पितुः (v) --------------- अत्र आगता।

**शुभ्रा -** अहमपि अनेन एव कारणेन अत्र (vi) ---------------- ।

**क्षमा –** अधुना त्वम् कुत्र (vii) ----------------- ?

**शुभ्रा –** अधुना (viii) -------------- कमलानगरे निवसामि ।

**क्षमा –** शोभनं जातम्। अहम् अपि (ix) ____________निवसामि।

**शुभ्रा –** अस्तु! अद्य प्रभृतिः (x) -------- मिलित्वा एव विद्यालयम् आगमिष्यावः ।

**मञ्जूषा**

| | | | | |
|---|---|---|---|---|
| तव, | तत्रैव, | विद्यालयात्, | केन्द्रीयविद्यालयात्, | निवससि, |
| कक्षायाम्, | स्थानान्तरवशात्, | अहम्, | आवाम् , | आगता |

**अथवा**

**मञ्जूषातः पदानि विचित्य अधोलिखितकथायां रिक्तस्थानानि पूरयत ।** (½ x10=5)

एकस्मिन् (i) ------------ एकः (ii) ------------ बालकः वसति स्म । तस्य नाम श्यामः (iii) ------------ । सः सर्वदा ग्रामीणजनान् तुदति स्म । (iv) सः उपहासेन -------------- अकथयत् यत्- सिंहः आगतः, सिंहः आगतः । माम् रक्ष इति । सर्वे ग्रामीणजनाः अपि तस्य (v) ----------- -- धावन्ति स्म । जना: तत्र गमनात् परं स: श्यामः तान् अकथयत् यत् – अत्र सिंह: नागच्छति, भवन्त: सर्वे मूर्खा: इति। सर्वे तस्मै क्रुध्यन्ति स्म । एकदा सत्यमेव सिंहः आगच्छत् । सः तस्य सहायतायै (vi) -------------- आह्वयति स्म । परन्तु (vii) --------------- दिने (viii) परिणामतः ---------------- एक: न आगच्छत्। (ix) ---------------- तम् अमारयत् । अतएव उक्तम्- असत्यम् (x) -------------- न वक्तव्यम् ।

**मञ्जूषा**

| |
|---|
| आसीत् , सर्वदा , सिंहः , ग्रामे , असत्यवादी , रक्षायै , कदापि , तस्मिन् , कोऽपि , सर्वान् |

## 'ग' 'भागः ( अनुप्रयुक्तव्याकरणम् )

**3. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत- (केवलं प्रश्नत्रयम्)**।(1x3 =3)

(i) स: च **क्रुधस्तां** व्यलोकयत् ।

(ii) अपरं धर्मं **करोमि+अहम्** ।

(iii) **फलानि+अपि** परार्थाय भवन्ति ।

(iv) **ततश्च** सा साध्वी मुने: अन्तिकम् आगता ।

**4. विकल्पेभ्य: उचितं कारकोपपदं चित्वा रिक्तस्थानानि पूरयत । (केवलं प्रश्नत्रयम्)** (1x3 =3)

(i) _______ बहि: देवालय: अस्ति ।

(क) विद्यालये (ख) विद्यालयात् (ग) विद्यालयस्य (घ)विद्यालय:

(ii) मृग: _______ बिभेति।

(क) सिंह: (ख) सिंहस्य (ग)सिंहात् (घ)सिंहौ

(iii) बालकाः _______ अध: क्रीडन्ति ।

(क) वृक्षस्य (ख) वृक्षात् (ग) वृक्षे (घ) वृक्षं

(iv) राम: _______ निपुण: अस्ति ।

(क) अध्यापनेन (ख) अध्यापनम् (ग) अध्यापने (घ) अध्यापनात्

**5. . प्रदत्तविकल्पेभ्यः उचित-शब्दरूपैः रिक्तस्थानानि पूरयत- (केवलं प्रश्नचतुष्टयम्)** (1×4=4)

(i) राजसभायां _____ प्रवेशो न सुलभ: ।

(क) त्वं (ख) तुभ्यं (ग) तव (घ) तेषु

(ii) जनक: प्रभावित: भूत्वा ____ निवेदितवान् ।

(क) तस्मै (ख) तस्य (ग) तेन (घ) त्वया

(iii) आचार्य:! ____ अयं ऋषि: ?

(क) कस्मिन् (ख) केन (ग) कम् (घ) क:

(iv) यदि ______ वक्रा किं तस्या: जलमपि वक्रम् ?

(क) नद्या: (ख) नदी (ग)नद्याम् (घ)नदीम्

(v) राज्यं ____________ नास्ति ।

(क) भवान् (ख) भवति (ग) भवन्तम् (घ) भवत:

**6. प्रदत्तविकल्पेभ्यः उचितधातुरूपैः रिक्तस्थानानि पूरयत- (केवलं प्रश्नचतुष्टयम्)** (1×4=4)

(i) तव पिता शास्त्रार्थाय गत: _____ ।

(क) आसन् (ख) आसीत् (ग) स्म (घ) आसी

(ii) वदान्यगुरवे तरवे नम: ____ ।

(क) सन्तु (ख) एधि (ग) स्ताम् (घ)अस्तु

(iii) श्रद्धावान् ज्ञानं ____ ।

(क) लभते (ख) लभन्ते (ग) लभेते (घ)लभे

(iv) अहं राजसभां गत्वा _____का वार्ता ?

(क) ज्ञास्याम: (ख) ज्ञास्यति (ग)ज्ञास्यामि (घ)ज्ञास्यसि

(v) रजक: वस्त्रं __________ ।

(क) क्षालयति (ख) क्षालयन्ति (ग) क्षालयत: (घ) क्षालयामि

**7.अधोलिखितवाक्येषु मञ्जूषायां प्रदत्तसंख्या: संस्कृतेन लिखत। (केवलं प्रश्नद्वयम्)** (½×2=1)

(i) तत्र _______ (3) बालका: गच्छन्ति ।

(ii) _______ (2) कन्ये विद्यालयं गच्छत: ।

(iii) वेदा: _______ (4) सन्ति।

**'घ' भागः (पठितावबोधनम्)**

**8. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत ।**

महर्षे: आरुणे: पुत्र: श्वेतकेतु: आसीत्। द्वादशवर्षीयं तं पुत्रं पिता आरुणि: उवाच - हे श्वेतकेतो ! गुरुं प्रति गच्छ अध्ययनार्थं यत : सौम्य ! अस्मत्कुलिन: अनधीत्य न भवति इति। स: पुत्र: आचार्यम् उपेत्य यावत् चतुर्विंशतिवर्ष: अभवत् तावत् स: सर्वान् वेदान् सार्थान् अधीत्य पितु: सकाशम् आगच्छत्। स: च ' सर्वश्रेष्ठ: अहम् ' इति मन्यमान: उद्धत स्वभाव: अभवत् ।

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** (½×2=1)

(क) श्वेतकेतु: कस्य पुत्र: आसीत्?

(ख) श्वेतकेतु: किमर्थं गुरुं प्रति अगच्छत्?

(ग) श्वेतकेतु: कम् उपेत्य वेदान् अपठत्?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** (1×2=2)

(क) श्वेतकेतु: किं कृत्वा पितु: सकाशम् आगच्छत् ?

(ख) श्वेतकेतु: कथम् उद्धतस्वभाव: अभवत् ?

(ग)पिता आरुणि: तं पुत्रं किम् उवाच ?

**III. भाषिककार्यम् - (केवलं प्रश्नद्वयम्)** (1×2=2)

(i) **"महर्षे: आरुणे:"** अनयो: पदयो: किं विशेषणपदम् ?

(ii) **"गच्छ " इति** क्रियाया: किं कर्त्तृपदम् ?

(iii) **"पठित्वा"** इत्यर्थे किं पर्यायपदम् अत्र प्रयुक्तम् ?

**9.अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत ।**

**छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।**
**फलान्यपि परार्थाय वृक्षा: सत्पुरुषा इव ।।**

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** (½×2=1)

(i) के सत्पुरुषाः इव भवन्ति ?

(ii) वृक्षा: अन्यस्य कृते किं कुर्वन्ति ?

(iii) के आतपे तिष्ठन्ति ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **(1x2 =2** )

(i) वृक्षा: कीदृशा: इव भवन्ति ?

(ii) वृक्षाः कुत्र तिष्ठन्ति ?

(iii) वृक्षा: परार्थाय किमर्पयन्ति ?

**III. भाषिक-कार्यम्-(केवलं प्रश्नद्वयम्)** (1×2=2)

(i) “ **वृक्षा: आतपे तिष्ठन्ति ।** ” इत्यत्र **तिष्ठन्ति** इति क्रियाया: किं कर्त्तृपदम् ?

(iii) “**पादपा:** ” इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

(iii) “**छायामन्यस्य कुर्वन्ति** ” इत्यत्र किं क्रियापदम् अत्र प्रयुक्तम् ?

**10. रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत- (केवलं प्रश्नद्वयम् )** (1×2=2)

(i) आरुणिः **श्वेतकेतो:** पिता आसीत् ।

(ii) श्वेतकेतु: **बीजे** फलानि पश्यति ।

(iii) **राज्ञा** हास्यकारणं पृष्टम् ।

**11. रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितार्थं विकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नत्रयम्)** (1x3=3)

(i) मातुः वार्ता **निशम्य** अष्टावक्रः राजसभां गच्छति ।

(क) श्रुत्वा (ख) दृष्ट्वा (ग) प्रणम्य (घ) मत्वा

(ii) चन्दनपादपः **समन्तात्** सत्त्वभरैः आश्रितम् ।

(क) सर्वतः (ख) पूर्वतः (ग) पृष्ठतः (घ) उभयतः

(iii) स्वधर्मं चर , येन **आशु** परं श्रेयः अवाप्स्यसि ।

(क) बिलम्बेन (ख) श्वः (ग) ह्यः (घ) शीघ्रं

(iv) सः पुत्रः आचार्यम् **उपेत्य** अपठत् ।

(क) दूरं गत्वा (ख) समीपं गत्वा (ग) भवनं गत्वा (घ) गृहं गत्वा